শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামাষ্টকম্ ॥

শ্রীরাম রাম রঘুনন্দন রাম রাম
শ্রীরাম রাম ভরতাগ্রজ রাম রাম।
শ্রীরাম রাম রণকর্কশ রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ 1 ॥

শ্রীরাম রাম দিৱিজেশ্ৱর রাম রাম
শ্রীরাম রাম মনুজেশ্ৱর রাম রাম।
শ্রীরাম রাম জগদীশ্ৱর রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ 2 ॥

শ্রীরাম রাম ৱিবুধাশ্রয রাম রাম
শ্রীরাম রাম জগদাশ্রয রাম রাম।
শ্রীরাম রাম কমলাশ্রয রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ 3 ॥

শ্রীরাম রাম গুণসাগর রাম রাম
শ্রীরাম রাম গুণভূষণ রাম রাম।
শ্রীরাম রাম গুণভাজন রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ 4 ॥

শ্রীরাম রাম শুভমঙ্গল রাম রাম
শ্রীরাম রাম শুভলক্ষণ রাম রাম।
শ্রীরাম রাম শুভদাযক রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ 5 ॥

শ্রীরাম রাম সুজনপ্রিয রাম রাম
শ্রীরাম রাম সুমুনিপ্রিয রাম রাম।
শ্রীরাম রাম সুকৱিপ্রিয রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ **6**॥

শ্রীরাম রাম কমলাকর রাম রাম
শ্রীরাম রাম কমলেক্ষণ রাম রাম।
শ্রীরাম রাম কমলাপ্রিয রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ **7**॥

শ্রীরাম রাম দনুজান্তক রাম রাম
শ্রীরাম রাম দুরিতান্তক রাম রাম।
শ্রীরাম রাম নরকান্তক রাম রাম
শ্রীরাম রাম শরণং ভৱ রাম রাম॥ **8**॥

শ্রীরামচন্দ্রঃ স পুনাতু নিত্যং
যন্নামমধ্যেন্দ্রমণিং ৱিধায।
শ্রীচন্দ্রমুক্তাফলযোরুমাযা -
শ্চকার কণ্ঠাভরণং গিরীশঃ॥ **9**॥

শ্রীরামচন্দ্রচরণৌ মনসা স্মরামি
শ্রীরামচন্দ্রচরণৌ ৱচসা গৃণামি।
শ্রীরামচন্দ্রচরণৌ শিরসা নমামি
শ্রীরামচন্দ্রচরণৌ শরণং প্রপদ্যে॥ **10**॥

রামাষ্টকমিদং পুণ্যং প্রাতঃকালে তু যঃ পঠেৎ।
মুচ্যতে সর্ৱপাপেভ্যো ৱিষ্ণুলোকং স গচ্ছতি॥ **11**॥

॥ ইতি শ্রীরামাষ্টকং সমাপ্তম্॥